मुत्तुस्वामि दीक्षितर् विरचित

# श्रीकृष्ण कीर्तननि

***typeset in $\LaTeX\,2_\varepsilon$ and pdf$\LaTeX$,***

***using Type I Velthuis dvng fonts***

**©August 2003**

## 1 anantabAlak.rShNa

# अनन्तबालकृष्ण

रागं: ईशमनोहरि (२८) तालं: आदि

पल्लवि

अनन्तबालकृष्ण मामव मुकुन्द श्रीहरे
वनजमुखाम्बुजपदसुमते दीनावन नगधरशौरे

समष्टिचरणम्

धनञ्जयसारथे दयानिधे कृपां कुरु

मनोमयकोशात्मकामरगुरुगुहानन्द
मायामयगोकुलवासनिरञ्जन श्री

✠ ✠ ✠ ✠ ✠

## 2 bAlagOpAla

# बालगोपाल

रागं: भैरवि (२०)  तालं: आदि

पल्लवि

बालगोपाल पालयाशु मां भक्तवत्सल कृपाजलधे हरि

अनुपल्लवि

नीलनीरदशरीर धीरतर नीरजकर निरुपमानन्दकर
लीलया गोपवेषधर मुरलीधर श्रीधर दामोदर वर

चरणम्

चाणूरमल्लहरणनिपुणतर चरणनिहतशकटासुर मुरहर

माणिक्यमकुटहारवलयधर मत्तेभकुम्भभेदनपटुतर

वाणीशार्चितपीताम्बरधर वैजयन्तीवनमालाधर

आणवादिविजयमानसाकर अपहतकंसासुर नतभूसुर

द्रोणकर्णदुर्योधनादिहर द्रौपदीमानसंरक्षणकर
वैणिकगायकगुरुगुहनुत पुरवैरिविहित गोपिकामनोहर

✠ ✠ ✠ ✠ ✠

## 3 bAlak.rShNam bhAvayAmi

# बालकृष्णं भावयामि

रागं: गोपिकावसन्तम् (२०)      ताळं: आदि

पल्लवि

बालकृष्णं भावयामि बलरामानुजं वसुदेवजम्

अनुपल्लवि

नीलमेघगात्रं स्तुतिपात्रं नित्यानन्दकन्दं मुकुन्दम्

चरणम्

कमललोचनं कर्ममोचनं कपटगोपिकावसन्तं

अमरार्चितचरणं भवतरणं अर्जुनसारथिं करुणानिधिम्

ममतारहितं गुरुगुहविहितं माधवं सत्यभामाधवं
कमलेशं गोकुलप्रवेशं कंसभञ्जनं भक्तरञ्जनम्

✠ ✠ ✠ ✠ ✠

## 4 cetaH shrIbalak.rShNam

# चेतःश्रीबालकृष्णम्

रागं: जुजावन्ति (२८)     ताळं: रूपकम्

पल्लवि

चेतःश्रीबालकृष्णं भज रे
चिन्तितार्थप्रदचरणारविन्दं मुकुन्दम्

अनुपल्लवि

नूतननीरदसदृशशरीरं नन्दकिशोरं

पीतवसनधरं कम्बुकन्धरं गिरिधरम्

पूतनादिसंहारं पुरुषोत्तमावतारं
शीतलहृदयविहारं श्रीरुक्मिणीदारम्

चरणम्

नवनीतगन्धवाहवदनं मृदुगदनं

नलिनपत्रनयनं वटपत्रशयनं

नवचम्पकनासिकं अतसीसुमभासकं

नतेन्द्रादिलोकपालकं मृगमदतिलकम्

नवतुलसीवनमालं नारदादिमुनिजालं

## 5 gopAlak.rShNAya

# गोपालकृष्णाय नमस्ते

रागं: काम्भोजि (२८)    ताळं: आदि

पल्लवि

गोपालकृष्णाय नमस्ते गानलोलाय गुरुगुहनुताय

अनुपल्लवि

गोपीजनमनोल्लासाय गरुडवाहाय गोपतोषाय

चरणम्

द्वारकावासदामोदराय दासजनाभीष्टवरप्रदाय

दारिद्र्यदुःखादिभञ्जनाय द्रौपदीमानसंरक्षकाय

धरणीधराय तत्वातीताय तामरसाक्षपदपङ्कजाय

परमभागवतप्रह्ळादभक्तरक्षणाय पाण्डवहिताय

✠ ✠ ✠ ✠ ✠

## 6 govardhanagirIsham

# गोवर्धनगिरीशम्

रागं: हिन्दोळम् (२०)  तालं: रूपकम्

पल्लवि

गोवर्धनगिरीशं स्मरामि अनिशं
गोपिकादिमनोहरं गर्वितकंसादिहरम्

समष्टिचरणम्

गोविन्दनामसारं गजेन्द्ररक्षणधीरं
कविजनहृन्मन्दारं कनकजितसुशरीरम्
रविशशिनयनविलासं रमणीयमुखाभासं
शिवगणादिविश्वासं श्रीगुरुगुहमनोल्लासम्

✠ ✠ ✠ ✠ ✠

## 7 k.rShNAnanda

# कृष्णानन्दमुकुन्दमुरारे

रागं: गौळिपन्तु (१५) तालं: मिश्र चापु

पल्लवि

कृष्णानन्दमुकुन्दमुरारे कृपां कुरु केशव शौरे हरे

अनुपल्लवि

तृष्णारहित गोपीजनवल्लभ त्रिविक्रम
नारायण वासुदेव गोविन्द पद्मनाभ

चरणम्

यादववंशपयोनिधिचन्द्र यमळार्जुनादिभञ्जनोपेन्द्र
माधव मामव विनतविधीन्द्र मायातीत करुणासान्द्र
वेदनुतगौरीपान्तरङ्गादिगुरुगुहमोद
मुरळीनादभेदविनोद पङ्कजपाद मम प्रसीद श्रीधर

✠ ✠ ✠ ✠ ✠

## 8 murahareNa mukundena

# मुरहरेण मुकुन्देन

रागं: शुद्धमुखारि (१)  तालं: रूपकम्

पल्लवि

मुरहरेण मुकुन्देन केशवेन रक्षितोऽहम्

समष्टिचरणम्

पुरन्दरादिपूजितमुनिपुङ्गवसन्नुतेन

परमभागवतप्रणतप्रसिद्धगुरुगुहनुतेन

परमशुद्धमुखारिरागतोषितेन वरेण

✠ ✠ ✠ ✠ ✠

## 9 nanda gopAla

# नन्दगोपाल

रागं: यमुनाकल्याणि (६५)  तालं: आदि

पल्लवि

नन्दगोपाल मुकुन्द गोकुलनन्दन्न यमुनातीरविहार

अनुपल्लवि

मन्दरगिरिधर मामव माधव मुरलीधर मधुसूधन हरे

चरणम्

मन्दहासवदन मञ्जुळचरण अरविन्दलोचन आश्रितरक्षण

पीताम्बरधर पन्नगशयन कलिकल्मषहरण करुणापूरण

वन्दितमुनिबृन्द गुरुगुहानन्द वैकुण्ठस्थितानन्द-
कन्द गोवर्धनोद्धार गोपस्त्रीजार गोविन्द

✠ ✠ ✠ ✠ ✠

## 10 rAjagopAlam

# राजगोपालम्

रागं: मोहनम् (६५) ताळं: रूपकम्

पल्लवि

राजगोपालं भजेऽहं रमालीलम्

अनुपल्लवि

तेजोमयमोहनकरं दिव्याम्बरादिधरं
गजराजपूजितपदं गुणिजननतगोविन्दम्

चरणम्

नारदादिकृतभजनं नादलययुतसदनं

हरिद्रानदीतीरं हत्यादिपापहरम्

पारिजाततरुमूलं पङ्कजनयनविशालं
गुरुगुहहितवनमालं गोपीजनमालोलम्

✠ ✠ ✠ ✠ ✠

## 11 santAnagopAlak.rShNam

# सन्तानगोपालकृष्णम्

रागं: खमाश् (२८) तालं: रूपकम्

पल्लवि

सन्तानगोपालकृष्णमुपास्महे श्री

अनुपल्लवि

सन्तानसौभाग्यवितरणनिपुणतरं
सन्ततं सद्गुरुगुहसन्नुतं सारसकरम्

चरणम्

श्रीरुक्मिणीसत्यभामासमेतं

अर्जुनप्रेमास्पदं आश्रितजनफलदम्

नर्तनमुरलीधरं नतशुकसनकनारदं
नीरजासनादिनुतं नीलमेघजितगात्रम्

✠ ✠ ✠ ✠ ✠

## 12 sArasadalanayana

# सारसदळनयन

रागं: खमास् (२८) ताळं: त्रिपुट

पल्लवि

सारसदळनयन सङ्कटहरण हरे गोविन्द मं पाहि

अनुपल्लवि

नीरजासनादिपूजिताङ्ग श्रीरमान्तरङ्ग शुभाङ्ग
मुरहर अभयप्रद मुकुन्द यादवकुलभूषण माधव

चरणम्

माघमासोत्सवप्रभाव मानितगुरुगुहवन्दित भव
गोकुलजनपाल गोपिकामनोहर गोवर्धनधर

✠ ✠ ✠ ✠ ✠

## 13 shrI k.rShNaM bhaja mAnasa

# श्रीकृष्णं भज मानस

रागं: तोडि (८) तालं: आदि

पल्लवि

श्रीकृष्णं भज मानस सततं श्रितजनपरिपालं गोपालं बालम्

अनुपल्लवि

पाकशासनादिविनुतचरणं शोकमोहभयहरणं भवतरणम्

चरणम्

शङ्खचक्रगदापद्मवनमालं वेणुगानलोलं कृपालवालं

कङ्कणकेयूरमकुटमण्डितकमनीयकनकमयचेलम्

पङ्कजासनादिदेवमहितं श्रीगुरुगुहविहितं रमासहितं
पङ्कजदळनयनं वटशयनं गुरुपवनपुराधीशं लोकेशम्

✠ ✠ ✠ ✠ ✠

## 14 shrI k.rShNaM bhaja re

# श्रीकृष्णं भज रे

रागं: रूपवति (१२) तालं: रूपकम्

पल्लवि

श्रीकृष्णं भज रे रे मानस श्रीरूपवतीगोपस्त्रीजारम्

समष्टिचरणम्

चक्रनिवारितभास्करप्रकाशं चन्द्रशेखरगुरुगुहविश्वासं

अक्रूरवन्दितपदं अर्जुनप्रेमास्पदं

नक्रहतदन्तिवरदं नतशुकसनकनारदम्

✠ ✠ ✠ ✠ ✠

## 15 shrI k.rShNo mAm

# श्रीकृष्णो मां रक्षतु

रागं: नासामणि (७०) तालं: रूपकम्

पल्लवि

श्रीकृष्णो मां रक्षतु गुरुगुहानन्दवरः

अनुपल्लवि

सकृदाराधिततोषो सकलसुरबृन्दवन्दितः

चरणम्

वसुदेवसुतो वरदो काञ्चीनगरविहारो

कंसचाणूरमर्दको कौन्तेयहितबोधको

नासामणिधरो नवनीतचोरधीरो

नवनवगोपस्त्रीरासक्रीडावेषधरो हरिः

✠ ✠ ✠ ✠ ✠

## 16 shrI rAjagopAla

# श्रीराजगोपाल

रागं: सावेरि (१५) तालं: आदि

पल्लवि

श्रीराजगोपाल बाल शृङ्गारलील श्रितजनपाल

अनुपल्लवि

धीराग्रगण्य दीनशरण्य चारुचम्पकारण्य
दक्षिणद्वारकापुरिनिलय विशिष्टाद्वैताद्वैतालय मां पालय

चरणम्

स्मेरानन सेवकचतुरानन नारायण

तारकदिव्यनामपारायणकृतनारदादिनुत सारसपद

सदामोद नारीवेषधर वामभाग मुरारे श्रीविद्याराज हरे

श्रीरुक्मिणीसत्यभामश्रितपार्श्वयुगळ कम्बुजयगल

नीरसंपूर्णहरिद्रानदीतीरमहोत्सववैभव माधव मारजनक
नतशुकसनकजनक वीर गुरुगुहमहित रमासहित

✠ ✠ ✠ ✠ ✠

## 17 shrI veNugopAla

# श्रीवेणुगोपाल

रागं: कुरञ्जि (२९) तालं: झम्प

पल्लवि

श्रीवेणुगोपाल श्रीरुक्मिणीलोल
देवनायक श्रियं देहि देहि मधुमुरहर

अनुपल्लवि

देवकीसुकुमार दीनजनमन्दार
गोवर्धनोद्धार गोपयुवतीजार

चरणम्

गोकुलाम्बुधिसोम गोविन्द नतभौम

श्रीकुरञ्जितकाम श्रितसत्यभाम

कोकनदपदसोम गुरुगुहहित श्याम

श्रीकरतपहोम श्रीजयन्तीनाम

प्राकट्यरणभीम पालितार्जुनभीम
पाकरिपुनुतनाम भक्तयोगक्षेम

✠ ✠ ✠ ✠ ✠

## 18 shrI veNugopAlam

# श्री वेणुगोपालम्

रागं: शङ्कराभरणम् (२९)  तालं: रूपकम्

पल्लवि

श्री वेणुगोपालं भज मानस सततं
देवेन्द्रपूजितं दिव्यरत्नभूषितम्

अनुपल्लवि

वेदागमघोषितं विधिगुरुगुहमहितं
नन्दगोपकुमारं नवनीतचोरम्

चरणम्

गोवर्धनगिरिधरं गोपस्त्रीजारं

मन्दहासवदनं मुकुन्दं मधुसूदनं
देवकीनन्दनं मृदुचरणं नीरजनयनम्

✠ ✠ ✠ ✠ ✠

## 19 shrI vidyArajagopalam

# श्रीविद्याराजगोपालम्

रागं: जगन्मोहनम् (३८) तालं: तिश्र एकम् पल्लवि

श्रीविद्याराजगोपालं भजेऽहं

श्रीरुक्मिणीसत्यभामासहितदिव्यदेहम्

समष्टिचरणम्

जीवेशजगन्मोहिनीरूपं नतगोपं श्रितमन्दारं

धात्रंशस्वरूपावतारं गोविन्दमिन्दुवदनं

गुरुगुहनुतमृदुगदनं देवकीनन्दनं वसुदेवहृदयचन्दनम्

✠ ✠ ✠ ✠ ✠

## 20 vAsudevamupAsmahe

# वासुदेवमुपास्महे

रागं: माळवापञ्चमम् (१५) तालं: रूपकम्

पल्लवि

वासुदेवमुपास्महे वसुदेवात्मजं हरिम्

अनुपल्लवि

वासवादिदेवजालवन्दितवैकुण्ठपदं
दासजनानामभीष्टदायकाम्भोजपदम्

चरणम्

कनकाङ्गमादिशेषं कपटदशाकृतिवेषं

अनन्तवेदघोषं अपगतरागद्वेषम्

घनकौस्तुभमणिभूषं गंभीरमृदुभाषं
वनजासनादिपोषं वरगुरुगुहसन्तोषम्

✠ ✠ ✠ ✠ ✠